## वर्तमाने लट्। (१२३/२१७३)

[1]आरब्धोऽपरिसमाप्तश्च वर्तमानः। [2]तस्मिन् वर्तमानेऽर्थे वर्तमानाद् धातोः लट् प्रत्ययो भवति। पचति। [3]पठति॥

## लटः शतृशानचावप्रथमासमानाधिकरणे। (१२४/३१००)

लटः[4] शतृशानचौ इत्येतावादेशौ भवतः, अप्रथमान्तेन चेत् तस्य सामानाधिकरण्यं भवति। पचन्तं देवदत्तं पश्य। पचमानं देवदत्तं पश्य। पचता कृतम्। पचमानेन कृतम्। अप्रथमासमानाधिकरणे इति किम्? [5]देवदत्तः पचति। लट् इति वर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। क्वचित् प्रथमासमानाधिकरणेऽपि [6]भवति। सन् ब्राह्मणः। अस्ति ब्राह्मणः। [7]विद्यमानः ब्राह्मणः। विद्यते ब्राह्मणः। जुह्वत्[8]। जुहोति। अधीयानः[9]। अधीते॥

[२७२] [10]माङ्याक्रोशे।

मा पचन्। मा पचमानः।

केचिद् विभाषाग्रहणमनुवर्तयन्ति 'नन्वोर्विभाषा' (३.२.१२१/२७८१) [11]इति। सा च [12]व्यवस्थिता। तत्र यथादर्शनं [13]प्रयोगा नेतव्याः॥

## सम्बोधने च। (१२५/३१०२)

प्रथमासमानाधिकरणार्थ आरम्भः। सम्बोधने च विषये लटः शतृशानचौ [14]प्रत्ययौ भवतः। हे पचन्। हे पचमान॥

## लक्षणहेत्वोः क्रियायाः। (१२३/३१०६)

लक्ष्यते चिह्न्यते येन तल्लक्षणम्। जनको हेतुः। धात्वर्थविशेषणं चैतत्। लक्षणे हेतौ चार्थे वर्तमानाद धातोः परस्य लटः शतृशानचौ आदेशौ भवतः, तौ चेल्लक्षणहेतू क्रियाविषयौ भवतः। [15]लक्षणे – शयाना भुञ्जते यवनाः। तिष्ठन्तोऽनुशासति गणकाः। हेतौ – अर्जयन् वसति। अधीयानो वसति। लक्षणहेत्वोः इति किम्? [16]पचति, पठति। क्रियायाः इति किम्? द्रव्यगुणयोर्मा भूत्। यः कम्पते सोऽश्वत्थः। यदुत्प्लवते तल्लघु। यन्निषीदति तद्गुरु। लक्षणहेत्वोः इति निर्देशः [17]पूर्वनिपातव्यभिचारलिङ्गम्॥

---

1. प्रारब्धः अ. क. ब. फ. 2. तस्मिन् नास्ति ब. क, वर्तमानेऽर्थे नास्ति अ. 3. पठति नास्ति अ. ब. क. 4. स्थाने इत्यधिकम् अ. ड. 5. देवदत्तः नास्ति फ. 6. भवतः ड. 7. विद्यमानो विद्यते ब, ब्राह्मणः नास्ति अ. 8–9. ब्राह्मणः इत्यधिकम् फ. 10. माङ चाक्रोशे ब. 11. इत्यतः ब. ड. 12. व्यवस्थिते विभाषा अ. ब. क. फ. ह. 13. प्रयोगो नेतव्यः इ. फ. ग. ह. 14. आदेशौ अ. ब. क. ड. ह. 15. लक्षणे नास्ति क. 16. पचति च पठति च अ. ब. क. 17. पूर्वनिपातव्यभिचारार्थः अ, पूर्वनिपातव्यभिचारचिह्नम् ड. इ. ग.